# श्रीसुरसरस्वतीसभा, शृङ्गेरि
## तुरीया परीक्षा
## द्वितीयपत्रिका

दिनाङ्कः – 04-02-2024 अङ्काः – 50

अपराह्ne – 1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** **5**

१. अयोध्या २. ग्रन्थालयः ३. संस्कृतस्य महत्त्वम्

**2** (अ) चतुर्थी विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । **4**

(आ) अनद्यतनभविष्यत्कालं द्योतयितुं कः लकारः उपयुज्यते ? तस्य लकारस्य परस्मैपद-आत्मनेपदप्रत्ययान् च लिखत । **4**

**3** (अ) उपमा-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । **4**

(आ) “तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः”- एतस्य वृत्तं सलक्षणं विवृणुत । **4**

**4 उत्तरं लिखत । (त्रयाणामेव)** **3**

१. अन्येषां वचनानि सूचयितुं किं चिह्नम् उपयुज्यते ? सोदाहरणं लिखत ।

२. ‘पृथक्’-शब्दयोगे काः विभक्तयः प्रयोक्तुं शक्यन्ते ?

३. सर्वलघुः कः गणः (छन्दोरीत्या) ?

४. अलङ्कारः कतिविधः ? निर्दिशत ।

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** **6**

१. जगाम २. अवर्धिष्ट ३. भविता ४. लप्सीष्ट

**6 प्रयोगपरिवर्तनं कुरुत ।** **4**

१. मृगाः त्रस्येयुः । २. अस्माभिः प्रातःकाले न क्रीड्यते ।

३. प्रयत्यतां यथाशक्ति, भविष्यते फलेन । ४. विधिवशात् प्राप्तेन सन्तुष्यताम् ।

**7 वाक्यदोषं परिहरत ।** **4**

१. चोराय भयम् ।

२. गोषु दुह्यमानासु सत्यां सः गतवान् ।

३. रामः चित्रकूटे आवसत् ।

४. अहम् अद्य प्रातः उद्याने अभूवम् ।

**8 टिप्पणीं लिखत । (एकस्य)** **2**

१. भावेप्रयोगः २. निर्धारणम्

**9 मातृभाषया अनुवदत ।** **5**

१. रामे उक्तवति सति दशरथः अब्रवीत् ।

२. शशासुः आङ्ग्लाः अस्माकं राष्ट्रं सार्धशतं समाः ।

३. पाण्डवाः द्वादश वर्षाणि वने अवात्सुः ।

४. अन्तरेण गुरुशुश्रूषां नावाप्यते विद्या ।

५. यद्यसौ सम्यक् अपठिष्यत्, तर्हि परीक्षाम् उत्तीर्णोऽभविष्यत् ।

**10 संस्कृतभाषया परिवर्तयत ।** **5**

१. ನೀವಿಬ್ಬರೂ ವಿದ್ಯೆಯನ್ನು ಪಡೆಯಿರಿ.

May both of you attain knowledge.

२. ಬೆಟ್ಟಗಳಲ್ಲಿ ಹಿಮಾಲಯ ದೊಡ್ಡದು.

Among the mountains, Himalaya is the highest.

३. ನಳ ಎಂಬ ರಾಜನು ಇದ್ದನು.

There lived a king called Nala.

४. ಹೀಗೆ ನನ್ನ ತಾಯಿ ಹೇಳಲಾಗಿ ನಾನು ಸುಮ್ಮನಾದೆನು.

I became quiet as my mother said so.

५. ನಾವು ನಾಳೇ ನಾಟಕವನ್ನು ಅಭಿನಯಿಸುವೆವು.

We will enact a drama tomorrow.

--------------------------